No. १३१९६ / क

Title शिवकवचम्

Author

Extent ९८ पत्र Age

Subject स्तोत्र

शिवकवचम्

नं० १३१६

नं० ~~१५०४~~ २६८

शिवकवचम्

17

Complete

शि॰
क॰
१

ॐश्रीगणेशायनमः अथशिवकवचविधिः का
र्त्तिकेमार्गशीर्षेवामाघेवैशाखसंज्ञिते श्रावणेब
हुलेपक्षेजपस्यारंभणंऊह १ शिवस्यकवचंजप्त्वा
सर्वाभीष्टार्थसिद्धये संपुटीकृत्ययोविद्वान्शिव
पंचाक्षरेणवै २ अनेनविधिनामंत्रंपुरश्चरणसंख्य
या जपेत्सांगचविधिनासर्वसिद्धिर्भविष्यति ३ एका
दशाशानंकुर्यादेकादशसहस्रकं जपेदेकादशाचल

द्वंच संख्या चोक्ता महर्षिभिः ४ शुचौ देशे समासीनो य
थावत्कल्पितासनः जितेंद्रियो जितः प्राणश्चिंतयेच्छि
वमव्ययं ५ अथप्रयोगः देशकालौस्मृत्वा ममेह
जन्मनि जन्मांतरे च निखिलदुरितदौर्भाग्यदुःस्वप्न
दुर्निमित्तग्रहभूतप्रेतपिशाचब्रह्मराक्षसादिबाधा
शांत्यर्थं पुत्रपौत्राद्यविच्छिन्नसंपत्तिसंततिप्राप्त
ये शत्रुपराजयसदाभीष्टसिद्धिहाराश्रीसांबसदा

शि
क
२

2

शिवप्रीत्यर्थं अमुकसंख्यया शिवकवचस्तोत्रं सह
स्रावर्त्तरोऽहं च शिवपंचाक्षरेण संपुटितं मंत्रजपं स्व
यं ब्राह्मणद्वारा वा करिष्ये तदंग गणेशपूजनं पु
ण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यादि
वरणं च करिष्ये साचार्यः शिवालयं गत्वा दर्भीयार
यमाणो देशकालौ संकीर्त्य पूर्वसंकल्पितसंख्याप
रिपूर्णार्थं प्रतिदिनममुकसंख्यावृत्ति शिवकव

चमंत्रजपमहंकरिष्ये उक्तप्रकारेणासनविधिं
भूतशुद्धिंस्थलशुद्धिंचकृत्वा मूलेनप्राणायाम
त्रयंकुर्यात् अथन्यासः अस्यश्रीशिवकवचस्तो
त्रमंत्रस्य ऋषभयोगीश्वरऋषिः साम्बसदाशि
वोदेवता अनुष्टुप्छंदः ममाभीष्टसिध्यर्थेजपेवि
नियोगः वामदेवायनमः शिरसिॐऋषभयोगी
श्वरऋषयेनमः मुखे पंक्तिछंदसेनमः हृदये

शि॰
क॰
३

३

सांबसदाशिवदेवतायैनमः गुह्ये ॐबीजायनमः पा
दयोः ॐउमाशक्तयेनमः सर्वांगे ॐभूर्भुवःस्वरोंभू
र्भुवःस्वः ॐअंगुष्ठाभ्यांनमः ॐभू॰ ॐनंतर्जनीभ्यां
नमः ॐभू॰ ॐमंमध्यमाभ्यांनमः ॐभू॰ ॐशिंअना
मिकाभ्यांनमः ॐभू॰ ॐवांकनिष्ठिकाभ्यांनमः ॐ
भू॰ ॐयंकरतलकरपृष्ठाभ्यांनमः एवंहृदयादि
न्यासः ॐनमोभगवते ॐमहारौद्रायज्वलज्वलज्वा

लामालिने ॐ ह्रीं श्रीं क्लीं नंश्रं गुष्टाभ्यांनमः ॐ नमोभ
गवने ॐ महारौद्राय ज्वलज्वलज्वालामालिने ॐ ह्रीं
श्रीं क्लीं मंतर्जनीभ्यांनमः ॐ नमोभगवने ॐ महारौद्रा
यज्वलज्वलज्वालामालिने ॐ ह्रीं श्रीं क्लीं पिं मध्यमा
भ्यांनमः ॐ नमोभगवने ॐ महारौद्राय ज्वलज्वल
ज्वालामालिने ॐ ह्रीं श्रीं क्लीं वांअनामिकाभ्यांनमः
ॐ नमोभगवने ॐ महारौद्राय ज्वलज्वलज्वालामा

शि० क० ४

लिने ॐ ह्रीं श्रीं क्लीं यं कनिष्ठिकाभ्यां नमः ॐ नमो भ
गवते ॐ महारौद्राय ज्वलज्वलज्वालामालिने ॐ
ह्रीं श्रीं क्लीं ॐ नमः शिवाय करतलकरपृष्ठाभ्यां न
मः एवं हृदयादिन्यासः अथ ध्यानम् वज्रदंष्ट्रं त्रि
नयनं कालकंठमरिंदमं सहस्रकरमत्युग्रं वंदे
देवं सदाशिवं १ देवप्रपन्नार्तिहर प्रसीद प्रसीद
विश्वेश्वर विश्ववंद्य प्रसीद गंगाधर चंद्रमौलेमां

त्राहि संसारभयादघोघात् २ ध्यायेन्नित्यं महे
शं रजतगिरिनिभं चारुचंद्रावतंसं रत्नाकल्पो
ज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं पद्मा
सीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसा
नं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं
त्रिनेत्रं ३ श्रीमत्कैलासवासं शशिधरमुकुटं त
त्वकामूर्त्तिनागं श्रीकंठं भूतनाथं शिवमजिन

शि· क· ५

परं चिंतयामो मृगांकं गंगाजूटं गणेशं गजदनुज
हरं कंजपादं कवेयं मालांकं शूलहस्तं प्रणतव
रमयं पार्वतीशं नमामि ४ इति ध्यानम् मूलेन
दिग्बंधनं कुर्यात् मानसोपचारैः संपूज्य लं पृथि
व्यात्मकं गंधं समर्पयामि नमः हं आकाशात्मकं
पुष्पं समर्पयामि नमः यं वाय्वात्मकं धूपं सम
र्पयामि नमः रं वह्न्यात्मकं दीपं समर्पयामि नमः

वेंश्चमत्तात्मकंनानानैवेद्यंसमर्पयामिनमः
समर्वात्मकंफलमूलताम्बूलादिकंसमर्पया
मिनमः अथप्राणायामः अतःपरंसर्वपुराण
गुह्यंनिःशेषपापौघहरंपवित्रं जयप्रदंसर्ववि
पत्प्रमोचनंवक्ष्यामिशैवंकवचंहितायते २ ओं
भूर्भुवःस्वरोंभूर्भुवःस्वःओंह्रींनमःशिवाय ऋ
षभउवाच एतत्पदंप्रतिपादेपठेत् २ ओंह्रींन

शि॰
क॰
८

मः नमस्कृत्यमहादेवं २ विश्वव्यापिनमीश्वरं २ व
क्ष्येशिवमयंवमा २ सर्वरत्नाकरंन्तणां २११ शुचौ
देशेसमासीनो २ यथावत्कल्पितासनः २ जितेंद्रि
योजितप्राण २ श्चिंतयेच्छिवमव्ययं २३ हृत्पुंडरी
कांतरसन्निविष्टं २ स्वतेजसाव्याप्तनभोवकाशं २
अतींद्रियंसूक्ष्ममनंतमाद्यं २ ध्यायेत्परानंदमयं
महेशं ४ ध्यानावधूताखिलकर्मबंध २ श्चिरंचि

दानंदनिमग्नचेताः २ षडक्षरन्याससमाहितात्मा
२ शैवेनकुर्यात्कवचेनरक्षां २ ५ मांपातुदेवोखि
लदेवतात्मा २ संसारकूपेपतितंगभीरे २ तन्ना
मदिव्यंवरमंत्रमूलं २ धुनोतुमेसर्वमघंहृदिस्थं
६ सर्वत्रमांरक्षतुविश्वमूर्ति २ ज्योतिर्मयानंदघ
नश्चिदात्मा २ अणोरणीयानुरुशक्तिरेकः २ सई
श्वरःपातुभयादशेषात् ७ योभूस्वरूपेणविभ

शि
क॰
७

र्निर्विघ्नं २ पायात्सभूमौ गिरिशोष्टमूर्तिः योपांस्वरूपं
णान्तणांकरोति २ संजीवनेसोवतुमांजलेभ्यः २ य
कल्पावसानेभुवनानिदग्ध्वा २ सर्वाणियोन्तत्यनिभू
रिलीलः २ सकालरुद्रोवतुमांदवाग्ने २ र्वात्यादिभी
तेरखिलाच्चतापात् ४ प्रदीप्तविद्युत्कनकावभा
सो २ विद्यावराभीतिकुठारपाणिः २ चतुर्मुखस्त
त्पुरुषस्त्रिनेत्रः २ प्राच्यांस्थितोरक्षतुमामजस्र

स्तं १० कुठारवेदाङ्कुशपाशशूल २ कपालढक्का
क्षगुणान्दधानः २ चतुर्मुखोनीलरुचिस्त्रिनेत्रः २
पायादघोरोदिशिदक्षिणस्यां ११ कुंदेंदुशंखस्फटि
काबभासो २ वेदाक्षमालावरदाभयांकः २ त्र्य
क्षस्चतुर्वक्त्रउरुप्रभावः २ सद्योभिजातोवतुमां
प्रतीच्यां १२ वराक्षमालाभयटंकहस्तः २ सरो
जकिंजल्कसमानवर्णः त्रिलोचनश्चारुचतुर्मु

शि॰ ख्वोमां २ पायाड्डदीच्यांदिशिवामदेवः १३ वेदाभयेष्टां
क॰ कुशापाशटंक २ कपालढक्काक्षत्रिशूलपाणिः २
८ सितद्युतिःपंचमुखोवतान्मा २ मीशानऊर्ध्वंपरमप्र
काशः १४ मूर्धानमव्यान्ममचंद्रमौलिः २ भालंम
मावादथभालनेत्रः २ नेत्रेममाव्याद्भगनेत्रहारी २
नासांसदारक्षतुविश्वनाथः १५ पायाच्छ्रुतीमेश्रुत
गीतकीर्तिः २ कपोलमव्यात्सततंकपाली २ व

ॐसदावतुपंचवक्त्रो २ जिह्वांसदावतुवेदजि
ह्वः १८ कंठंगिरीशोवतुनीलकंठः स्कंदौहघस्कं
धगमःसदाव्यात् स्तनद्वयंपातुसदामहेशः
पार्श्वद्वयंमेभगवान्गिरीशः भुजद्वयंपातुभुजं
गधारी २ पाणिद्वयंपातुपिनाकपाणिः २ दोर्मू
लमव्यान्ममधर्मबाहुः २ वक्षस्थलंदक्षमखांत
कोव्यात् १७ ममोदरंपातुगिरिंद्रधन्वा २ मध्यंममा

श्री॰ क॰ ५

व्यान्मदनांतकारी २ हेरंबनाशोममपात्वनाभिं २ पा
यात्कटिंधूर्जटिरीश्वरोमे १८ ऊरूद्वयंपातुकवेरमि
त्रो जानुद्वयंमेजगदीश्वरोव्यात् २ जंघायुगंपुंग
वकेतुरव्या २ त्पादौममाव्यात्सुरवंद्यपादः १९ म
हेश्वरःपातुदिनादियामे २ मांमध्ययामेवतुवाम
देवः २ मांत्र्यंबकःपातुतृतीययामे २ वृषध्वज
पातुदिनांतयामे २॰ पायान्निशादौशशिशेखरो

मां गंगाधरो रक्षतु मां निशीथे २ गौरीपतिः पातु दिनावसाने २ मृत्युंजयो रक्षतु सर्वकालं २१ अंतस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिः स्थितं मां तदंतरे पातु पतिः पशूनां २ सदाशिवो रक्षतु मां समंतात् २२ तिष्ठंतु मव्याद्भुवनैकनाथ २ पायाद्व्रजंतं प्रमथाधिनाथः २ वेदांतवेद्योवतु मां निषण्णं २ मामव्ययः पातु शिवः शयानं २३

शि॰ क॰ १॰

10

मार्गेषु मोरवन्तुनीलकंठः २ शैलादिदुर्गेषु दुरत्र
यारिः २ अरण्यवासादिमहाप्रवासे २ पायान्म
गव्यायशदारपाकिः २४ कल्पांतकालोग्रपटुप्र
कोप २ स्फुटाट्टहासोच्चलितांडकोषः घोरारिसेना
र्णवदुर्निवारो २ महाभयादव्याद्वीरभद्रः २५ प
त्यश्वमातंगघटावरूथिनी २ सहस्रलक्षायुतको
टिभीषणा २ अक्षौहिणीनांप्रानमानन्तनायिनां २

ह्रिंयान्नरडोघोरऊ्ढारयारया २६ निहंतदस्मून्न
लयानलार्चि २ ज्वलत्रिसूलंत्रिपुरांनकस्य २
शार्द्दूलसिंहर्क्षहकादिहिंस्रान् २ संत्रासयत्वी
शायतुःपिनाकः २७ दुःस्वप्नदुःशकुनदुर्गतिदौ
र्मनस्य दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि उत्पा
कृ° तनापविषभीतिमसर्ग्रहार्त्तिव्याधींश्चनाशयत्र
मेजगतामधीशः २८ आदौपंचाक्षरमंत्रमष्टा

शि॰ तवारं जप्त्वा सहस्रवर्णोक्तं जपेत् ओं भूर्भुवः स्वरों
क॰ भूर्भुवः स्वः ओं ह्रीं नमः ओं नमो भगवते सदाशिवा
२२ य सकलतत्त्वात्मकाय सर्वमंत्रस्वरूपाय सर्व
यंत्राधिष्ठिताय सर्वतंत्रस्वरूपाय सर्वतत्त्वविदू
राय ब्रह्मरुद्रावतारिणे नीलकंठाय पार्वतीम
नोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धू
लितविग्रहाय महामणिमुकुट १॰ धारणाय

माणिक्यभूषणाय सृष्टिस्थितिप्रलयकारका
यरोद्धावतारायं दक्षाधरध्वंसनाय महाकालभै
रवाय मूलाधारैकनिलयाय नत्वातीताय गंगा
धराय सर्वदेवाधिदेवाय षडाश्रयाय वेदांतसा
राय त्रिवर्गसाधनाय अनेककोटिब्रह्माण्डजनका
य २० अनंतवासुकि तक्षककर्कोटकशंखकुलि
क पद्म महापद्मेत्यष्टमहानागकुलभूषणाय

शि॰ प्रणवस्वरूपाय चिदाकाशाय दिक्स्वरूपाय सक
क॰ लग्रहनक्षत्रमालिनेसकलाय सकलकलंकर
२२ हिताय सकललोकैककर्त्रे सकललोकैकहर्त्रे
12 सकललोकैकभर्त्रे सकललोकैकगुरवे ३॰ सक
ललोकैकसाक्षिणे सकलनिगमगुह्याय सकल
वेदान्तपारगाय सकललोकैकवरप्रदाय सकल
लोकैकशंकराय शशांकशेखराय शाश्वतनिजा

वासाय निराभासाय निरामयाय निर्मलाय नि
र्लोभाय निर्मोहाय निर्मदाय निश्चिंताय ध·· नि
रहंकाराय निराकुलाय निष्कलंकाय निर्गुणाय
निष्कामाय निरुपप्लवाय निरवद्याय निरंतराय
निरामयाय निष्कारणाय निरातंकाय निष्प्रपंचा
य निःसंगाय निर्द्वंद्वाय निराधाराय नीरोगाय
निष्क्रोधाय निर्गमाय निष्पापाय निर्भयाय निर्वि

शि
क॰
१३

कल्पाय निर्भेदाय निष्क्रियाय प॰ निरंजनाय नि
स्तुनाय निरुपमविभवाय नित्यशुद्धबुद्धमुक्तप
रिपूर्णसच्चिदानंदाद्वयाय परमशांतस्वरूपाय
तेजोरूपाय तेजोमयाय जयजय रुद्र महारौद्र
वीरभद्र भद्रावतार महाभैरव कालभैरव कल्पा
न्तभैरव कपालमालाधर खट्वांग खड्ग ८॰ चर्म
पाशांकुश डमरु त्रिशूल चाप बाण गदा शक्ति

13

भिंडिपाल तोमर मुसल मुद्गर पाश पट्टिश प
रशुपरिघ भुसुंडि शतघ्नी चक्रायुध भीषणकर
सहस्रमुख दंष्ट्राकराल विकटाट्टहास विस्फा
रित ब्रह्मांडमंडल नागेंद्रकुंडल नागेंद्रहार ०...
नागेंद्रवलय नागेंद्रचर्मांवरधर मृत्युंजय त्र्यंव
क त्रिपुरांतक विश्वरूप विरूपाक्ष विश्वेश्वरवृष
भवाहन विश्वतोमुख सर्वतोरक्षरक्ष ज्वलज्वल

शि० क० १४

महामृत्युभयं नाशय २ सर्वरोगात् उत्सादय २ वि
षसर्पभयं शमय २ चौरान्मारय २ प० ममशत्रू
न्घातय २ शूलेन विदारय २ कुठारेण भिंधि २ खड्गे
न छिंदि २ खट्वांगेन विपोथय २ मुसलेन निष्पेष
य २ बाणैः संताडय २ रक्षांसि भीषय २ भूतानि वि
द्रावय २ कूष्मांडवेतालमारीगणब्रह्मराक्षसा प०
न्संत्रासय २ ममाभयं कुरु २ वित्रस्तं मामाश्वासय

नरकभयान्मामुद्धर २ संजीवय २ क्षुन्नडार्त्तेर्म
माप्यायय २ दुःखात्तुरंमामानंदय २ शिवकव
चेनममाछादय २ मृत्युंजय त्र्यंबक सदाशिव
नमस्तेनमस्ते १०० ॐभूर्भुवःस्वरोंभूर्भुवःस्वः ॐ
ह्रींनमः ऋषभउवाच इत्येतत्कवचंशैवंवरदंव्या
ख्यातंमया सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां
यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमं नतस्यजा

शि॰ यतेक्कापिभयंपुंमोरनुग्रहात् क्षीणायुःप्राप्तमृ
क॰ त्युर्वामहारोगहतोपिवा सद्यःसुखमवाप्नोतिदी
१५ र्घमायुश्चविंदति सर्वदारिद्र्यशमनंसर्वमंगल
वर्धनं योधत्तेकवचंशैवंसदेवैरपिपूज्यते महा
पातकसंघातैर्मुच्यतेचोपपातकैः देहांतेमुक्तिमा
प्नोतिशिववर्मानुभावतः त्वमपिश्रद्धयावत्सशै
वंकवचमुत्तमं धारयस्वमयादत्तंसदाश्रेयोह्यवा

15

ष्यसि सूत उवाच इत्युक्त्वाऽस्य भो योगी तस्मै पा
र्थिवसूनवे ददौ शंखं महानादं त्वङ्कारिनिषूद
नं पुनश्च भस्म तस्मै मंत्रानंदं गं परितः स्पृशन् राजा
नो दृष्टसहस्रस्य द्विगुणं च बलं ददौ भस्मप्रभा
वात्संप्राप्तं बलेश्चर्यं धृतिः स्मृतिः स राजपुत्रः पु
पुमे प्रारदिं कुर्वन्स्त्रियातमाङ्गः प्रांजलिभूयः स
योगी त्वमनेदन पद्मवङ्क्षो मयादत्तं तनो मेत्रा

श्रि॰ नुभावतः तीक्ष्णधारमिमं खड्गं यस्मै दर्शयसे स्फु
क॰ टं समरयोम्म्रियते शत्रुः साक्षात्कस्तुरपि स्वयं श्वस
१८ शं खड्गस्य निस्त्रिंशं ये शृण्वंति तेन वाहिताः ते मूर्छिताः
पतिष्यंति त्यक्तप्राणा विचेतनाः खड्गशंखावि
मौ दिव्यौ परसैन्यविनाशिनौ आत्मसैन्यस्वपक्षा
णां शौर्यतेजोविवर्धनौ एतयोस्तु प्रभावेन शैवे
नकवचेन च द्विषट्सहस्रनागानां बलेन मह

16

तापिच भस्मधारणसामर्थ्याद्रुद्रसैन्यं विजेष्यसि
प्राप्य सिंहासने पित्र्यं गोप्तासि पृथिवीमिमां इति भ
द्रायुषं सम्यगनुशास्य समातृकं ताभ्यां स पूजितः
सोऽथ योगीश्वरगतिं ययौ इति श्रीस्कंदपुराणे ब्रह्मो
त्तरखंडे शिवकवचं संपूर्णम् ॥
ओं श्रीगणेशाय नमः अथ देवलोके अथ इष्टदेव
लोके देवलोक इति देवलोके किंनरः नरतेजः

शि तेजोरूपं रूपं दृष्ट्वा दृष्ट्वा देवेंद्रः देवेंद्रकवचयः कव
क॰ यः सर्वे कवचय इत्यर्थयः मंत्रयस्तु इंद्राः इंद्रो ब्रवीत्
१७ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामास्मिन्
राष्ट्रे राजन्यः शूर इषव्यो ऽतिव्याधी महारथो जाय
तां दोग्ध्री धेनुः वोढानड्वानाशुः सप्तिः पुरंधिः यो
षा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वी
रो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फ

लवन्त्योनऔश्वययःप्रत्यंन्तोयोगक्षेमोनःकल्प
न्तां ॥
मंत्रार्थाःसफलासंन्तुपूर्णासंन्तुमनोरथाः
शत्रूणांबुद्धिनाशोस्तुमित्राणामुदयस्तव ॥